| पापयुक्तः— | मरणविशेषविशिष्टः— | और्द्ध्वदेहिकपूर्व्वकालीनपुत्रादिकर्त्तव्यप्रायश्चित्तम् । |
|---|---|---|
| १३ निक्षेपहारकः | १३ कुक्कुरहतः | १३ अत्र प्रायश्चित्तस्यानुक्तत्वात् व्याघ्रादिहत इत्यत्रादिपददर्शनाच्च तत्रोक्तप्रायश्चित्तं युक्तम् ॥ |
| १४ रूपनाशकः | १४ गजहतः | १४ चतुर्निष्कमितहेमगजं दद्यात् ॥ |
| १५ पशुहिंसकः | १५ चौरहतः | १५ धेनुं दद्यात् ॥ |
| १६ पाशिकः | १६ अरण्ये शूकरहतः | १६ कुक्कुरहतवत् ॥ |
| १७ मत्सरी | १७ शौचहीनमृतः | १७ द्विनिष्कस्वर्णजहरिं दद्यात् ॥ |
| १८ मद्यविक्रेता | १८ पतितमृतः | १८ षोड़शप्राजापत्यानि कुर्य्यात् ॥ |
| १९ मित्रभेदी | १९ वैरिहतः | १९ वृषं दद्यात् ॥ |
| २० मेदिनीचौरः | २० भृगुपातहतः | २० धान्यपर्व्वतं दद्यात् ॥ |
| २१ यज्ञहानिकर्त्ता | २१ वह्निहतः | २१ स्वशक्तित उपानहं दद्यात् ॥ |
| २२ राजकुमारघ्नः | २२ राजहतः | २२ हिरण्मयपुरुषं दद्यात् ॥ |
| २३ राजदन्तिहृत् | २३ वृक्षहतः | २३ स्वर्णसंयुतं सौवर्णवृक्षं दद्यात् ॥ |
| २४ गोहृत् | २४ अतीसारमृतः | २४ संयतो लक्षसङ्ख्यकगायत्रीं जपेत् ॥ |
| २५ विषदः | २५ सर्पदष्टः | २५ नागबलिदानं काञ्चनदानञ्च कुर्य्यात् ॥ |
| २६ शङ्करद्रोही | २६ शृङ्गिहतः | २६ वस्त्रसंयुक्तवृषभं दद्यात् ॥ |
| २७ ब्राह्मणहृत् | २७ वान्तमाश्रित्य मृतः- अस्पृश्यस्पर्शनमृतश्च | २७ सच्छास्त्रपुस्तकं दद्यात् ॥ |
| २८ सूचकः | २८ शकटहतः | २८ उपस्करान्वितं अश्वं दद्यात् ॥ |
| २९ सेतुभेदी | २९ जलहतः | २९ निष्कत्रयमितस्वर्णवरुणं दद्यात् ॥ |
| ३० सदर्पकार्य्यकारकः | ३० साकिन्यादिहतः | ३० यथोचितं रुद्रं जपेत् ॥ |
| ३१ हिंस्रः | ३१ उद्बन्धनमृतः | ३१ पयस्विनीं गां दद्यात् ॥ |
| | ३२ हयाहतः | ३२ निष्कत्रयमितं स्वर्णं दद्यात् ॥ |
| | ३३ कपिहतः | ३३ कनकनिर्म्मितकपिं दद्यात् ॥ |
| | ३४ विसूचिकामृतः | ३४ शतं द्विजान् भोजयेत् ॥ |
| | ३५ कण्ठकवलमृतः | ३५ तिलधेनुं दद्यात् ॥ |
| | ३६ केशरोगमृतः | ३६ अष्टौ कृच्छ्रान् समाचरेत् ॥ • ॥ |

इति शातातपीयकर्म्मविपाके अगतीनां विशेषप्रायश्चित्तम् ॥ * ॥

अगतीनां साधारणप्रायश्चित्तम् ।

सपल्लवप्रधान्योपरि पञ्चपल्लवसर्व्वौषधिसंयुक्तं कृष्णवस्त्रसमाच्छन्नमकालमूलं कलसं संस्थाप्य तत्र महिषासनसंस्थितं चतुर्भुजं दण्डहस्तं स्वर्णकुण्डलसंयुतं निष्कपरिमितं प्रेतरूपिणं पुरुषं संस्थाप्य पूजयेत् । प्रत्यहं पुरुषसूक्तेन दुग्धेन तर्पयेत् तत्र कलसे षड़ुद्रं जपेत् । यमसूक्तेन यमपूजादिकं आत्मविशुद्ध्यर्थं गायत्रीजपं ग्रहशान्तिपूर्व्वकदशांशतिलहोमञ्च कुर्य्यात् । अज्ञातगोत्रविप्राय सतिलमुदकं दद्यात् ।

"इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् ।
ददामि तस्मै प्रेताय यः पीड़ां कुरुते मम" ॥

इति मन्त्रेण मधुशर्करायुक्तप्रस्थमितकृष्णतिलपिष्टपिण्डं प्रेतरूपाय दद्यात् । यजमानः प्रेतमुद्दिश्य तिलपात्रसंयुतान् द्वादशकृष्णकलसान् विष्णुमुद्दिश्यैकं कलसञ्च दद्यात् । वरुणधरः शुचिराचार्य्यः वरुणदैवतमन्त्रैः कलसोदकैर्दम्पती अभिषिञ्चेत् । ततो यजमान आचार्य्याय दक्षिणां दद्यात् नारायणबलिञ्च कुर्य्यात् ॥ * ॥

"एवं कृते विधानेन प्रकुर्य्यादौर्द्ध्वदेहिकम् ।
ततः प्रेतत्वनिर्म्मुक्ताः पावितास्तर्पितास्तथा ॥
दद्युः पुत्त्रांश्च पौत्त्रांश्च आयुरारोग्यसम्पदः" ॥

इति शातातपीयकर्म्मविपाकषष्ठाध्यायोक्तागतिप्रायश्चित्तविवरणम् ॥ * ॥

(मार्कण्डेयोक्ताः कर्मविपाकाश्च । यथा, तत्रैव १५ अध्याये उक्ताः ।

"पतितात् प्रतिगृह्यार्थं खरयोनिं व्रजेद्द्विजः ।
नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः ॥
उपाध्यायव्यलीकन्तु कृत्वा श्वा भवति द्विजः ।
तज्जायां मनसा वाञ्छन् तद्द्रव्यं चाप्यसंशयम् ॥
गर्द्दभो जायते जन्तुः पित्रोश्चाप्यवमानकः ।
मातापितरावाक्रुश्य शारिका सम्प्रजायते ॥
भ्रातुः पत्नीमवमन्ता च कपोतत्वं प्रपद्यते ।
तामेव पीड़यित्वा तु कच्छपत्वं प्रपद्यते ॥
भर्त्तृपिण्डमुपाश्नन् यस्तदिष्टं न निषेवते ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः ।
असूयकश्च नरकात् मुक्तो भवति राक्षसः ॥
विश्वासहन्ता च नरो मीनयोनौ प्रजायते ।
धान्यं यवांस्तिलान्माषान् कुलत्थान् सर्षपांश्चणान् ॥
कलायान् कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्यान्यन्यानि वा हृत्वा मोहाज्जन्तुरचेतनः ॥
सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभः ।
परदाराभिमर्षात्तु वृको घोरोऽभिजायते ॥
श्वा शृगालो वको गृध्रो व्याड़ः कङ्कस्तथा क्रमात् ।
भ्रातृभार्य्याञ्च दुर्ब्बुद्धिर्योधर्षयति पापकृत् ॥
पुंस्कोकिलत्वमाप्नोति स चापि नरकाच्च्युतः ।
सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्याञ्च पापकृत् ।
प्रधर्षैव हि कामात्मा शूकरो जायते नरः ॥
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
पुनर्द्दाता च कन्याया कृमिरेवोपजायते ।
देवता पितृविप्राणामदत्त्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकात् सोऽपि वायसः सम्प्रजायते ॥
ज्येष्ठं पितृसमं वापि भ्रातरं योऽवमन्यते ।
नरकात् सोऽपि विभ्रष्टः क्रौञ्चयोनौ प्रजायते ॥
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।